॥ श्री गुरुभ्यो नमः ॥ हरिः ॐ ॥

# अथ श्रीसूक्त पारायणम्

ॐ । पञ्चम मण्डलस्यान्ते खिल मन्त्राः । हिरण्यवर्णामिति मन्त्रस्य । पञ्चदशर्चस्य सूक्तस्य । आनन्दकर्दमः-चिक्लीतेन्दिरासुता ऋषयः । श्रीरग्निर्देवते । आद्यास्तिस्रोनुष्टुभः । चतुर्थिर्बृहति । पञ्चमीशष्ट्यौ त्रिष्टुभौ । सप्तमाद्यानुष्टुभः । अन्त्या प्रस्तारः पङ्क्तिः । हिरण्यवर्णामिति बीजम् । तां म आवह जातवेद इति शक्तिः । कीर्तिमृद्धिं ददातु म इति कीलकम् । श्री महालक्ष्मि कृपाकटाक्ष सिद्ध्यर्थे पारायणे विनियोगः॥

**अथाङ्गन्यासः**

ॐ हिरण्यवर्णाम् हरिणीं इति शिरसि । ॐ तां म आवह जातवेदो इति नेत्रयोः । ॐ अश्वपूर्वां रथमध्यां इति कर्णयोः । ॐ कांसोस्मितां हिरण्यप्राकारां इति नासिकायां । ॐ चन्द्रां प्रभासां इति मुखे । ॐ आदित्यवर्णे इति कण्ठे । ॐ उपैतुमां देवसखः इति बाह्वोः । ॐ क्षुत्पिपासमलां जेष्टां इति हृदये । ॐ गन्धद्वारां दुराधर्षां इति नाभौ । ॐ मनसः काममाकूतिं इति गुह्ये । ॐ कर्दमेन प्रजाभूता इति पादौ । ॐ आपः सृजन्तु स्निग्धानि इति ऊर्वोः । ॐ आर्द्रां पुष्करिणीं पुष्टिं इति जान्योः । ॐ आर्द्रां यः करिणीं यष्टिं इति जङ्घयोः । ॐ तां म आवह जातवेदो इति पादयोः । इति अङ्गन्यासः ॥

**अथ करन्यासः**

ॐ हिरण्यवर्णायै अङ्गुष्टाभ्यां नमः| ॐ हरिण्यै तर्जनीभ्यां नमः | ॐ सुवर्णरजतस्रजायै मध्यमाभ्यां नमः | ॐ चन्द्रायै अनामिकाभ्यां नमः | ॐ हिरण्मय्यै कनिष्टिकाभ्यां नमः | ॐ लक्ष्म्यै करतल करप्रुष्ठाब्यां नमः |

ॐ हिरण्यवर्णायै हृदयाय नमः| ॐ हरिण्यै शिरसे स्वाहा | ॐ सुवर्णरजतस्रजायै शिखायै वषट् | ॐ चन्द्रायै कवचाय हुं | ॐ हिरण्मय्यै नेत्रत्रयाय वौषट् | ॐ लक्ष्म्यै अस्त्राय फट् | इति दिग्बन्धः ||

**अथ ध्यानम्**

ॐ अरुणकमलसंस्था तद्रजः पुञ्जवर्णा करकमलधृतेष्ट-अभीतियुग्मांबुजाता |
मणिमुकुट-विचित्रालन्कृतिः पद्ममाला भवतु भुवनमाता सन्ततं श्रीः श्रियै नः ||

कमलं कलशं धेनुं ज्ञानमञ्जलिमेव च | पञ्चमुद्राः प्रदर्शयात्र श्रीसूक्तं प्रजपेद्बुधः ||

इति ध्यानम् ||

**॥ ॐ नमो भगवत्यै महालक्ष्म्यै नमः ॥**

हिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ (1)

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ (2)

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ (3)

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ (4)

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियम् लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥(5)

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ (6)

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ॥ (7)

क्षुत्पिपासामलां ज्येष्टामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ (8)

गन्धद्वारां दुराधर्षां नित्यपुष्टाम् करीशिणीं ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ (9)

मनसः काममाकूतिं वाचस्सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ (10)

कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ (11)

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥ (12)

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्राम् हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ (13)

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ (14)

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान्, विन्देयं पुरुशानहम् ॥ (15)

*परिशिष्ट*

यश्शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पन्चदशर्चं च श्रीकामः सततं जपेत् ॥ (16)

पद्मासने पद्मऊरु पद्माक्षी पद्मसम्भवे ।

त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहम् ॥ (17)

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवी सर्वकामार्थ सिद्धये ॥ (18)

पुत्र पौत्र धनं धान्यं हस्त्यश्वादिगवे रथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥ (19)

धनमग्निर्धनं वायुः धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमष्णुते ॥ (20)

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनी ॥ (21)

चन्द्राभां लक्ष्मीमिशानां सूर्याभां श्रियमैश्वरीम् ।
चन्द्रसूर्याग्निसंकाशं श्री महालक्ष्मीमुपास्महे ॥ (22)

न क्रोधो न च मात्स्तर्यो न लोभो नाशुभामतिः ।
भवन्ति कृत पुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा ॥ (23)

वर्षंतु ते विभावरी दिवो अभ्रस्य विद्युतः ।
रोहन्तु सर्वबीजान्यव ब्रह्मद्विषो जहि । (24)

पद्मप्रिये पद्मिनी पद्महस्ते पद्मालये पद्म दळायताक्षी ।
विष्णुप्रिये विष्णुमनोनुकूले त्वत्पादपद्मं मयि सन्निधस्त्व ॥ (25)

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिस्तनभरनमित शुभ्रवस्त्रोत्तरीया ।

लक्ष्मीर्दिव्यैर्गजेन्द्र्यैर्मणिगणखचितैः स्नापिता हेमकुम्भैः

नित्यं सा पद्महस्ता वसतु मम गृहे सर्वमाङ्गल्ययुक्ता || (26)

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीम्
दासीभूतसमस्तदेववनितां लोकैक दीपाङ्कुराम् |
श्रीमन्मन्दकटाक्षलभ्ध विभवब्रह्मेन्द्र गङ्गाधराम्
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् || (27)

सिद्धिलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मीः सरस्वती
श्रीलक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना भव सर्वदा ||(28)

वराङ्कुशौ पाशमभीति मुद्रां करैर्वहन्तीं कमलासनस्थाम्
बालार्ककोटिप्रतिभां त्रिणेत्रीं भजेहमाद्यां जगदीश्वरीं ताम् || (29)

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थसाधके
शरण्ये त्र्यम्बके गौरी नारायणि नमोस्तु ते || (30)

। । । । ॥
महालक्ष्म्यै च विद्महे विष्णु पत्न्यै च धीमहि | तन्नो लक्ष्मीः प्रचोदयात् ||

**फलश्रुति**

श्रीर्वर्चस्यमायुष्यमारोग्यं आविधात्पवमानं महीयते |
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं धीर्घमायुः ||

**|| ॐ श्री सूक्त पारायणं संपूर्णम् ||**

|| श्री गुरुभ्यो नमः || हरिः ॐ ||

|| hariḥ Om ||

# atha śrī sūktam

pancama mandalasyānte khilamantrāḥ | hirańyavarńāmiti mantrasya |
pancadaśarchasya sūktasya | ānanda kardamaḥ ciklītēndirāsuta riśayaḥ |
śrīragnirdevatē | ādyāstisronuśtubhaḥ | caturthīrbrihatī |
pancamī śaśtyau triśTubhau | saptamādyānuśTubhaḥ antyā prastārapanktīḥ |
hirańyavarńāmti bījam | tām ma āvaha jātavēda iti śaktiḥ |
kīrtimruddhim dadātu iti kīlakam |
śrī mahālakśmī krupākatākśa sidhyarthē pārāyanē viniyogaḥ ||

**athānganyāsaḥ**

Om hirańyavarńām harińīm iti śirasi | Om tām ma āvaha jātavēdō iti nētrayōḥ |
Om aśvapūrvām rathamadhyām iti karńayōḥ | Om kāmsōsmitām
hirańyaprākārām iti nāsikāyām | Om candrām prabhāsām iti mukhe |
Om ādityavarńē iti kanTe | Om upaitumām dēvasakhaḥ iti bāhvayōḥ |
Om kśutpipāsāmalām jyēśtām iti hrudaye | Om gandhadvārām
durādharśām iti nābhau | Om manasaḥ kāmamākūtim iti guhye |
Om kardamēna prajābhūtā iti pādau | Om āpaḥ srujantu snigdhāni iti ūrvau |
Om ārdrām puśkarińīm puśTim iti jānyōḥ | Om ārdrām yaḥ karińīm
yaśTim iti janghyōḥ | Om tām ma āvaha jātavēdō iti pādayōḥ |
iti anganyāsaḥ ||

**atha karanyāsaḥ**

Om hirańyavarńāyai anguśTabhyām namaḥ | Om harińyai tarjanībhyām namaḥ |
Om suvarńarajatasrajāyai madhyamābhyām namaḥ | Om candrāyai anāmikābhyām
namaḥ | Om hirańmayyai kaniśTikābhyām namaḥ | Om lakśmyai karatala
karapruśTabhyām namaḥ |
Om hirańyavarńāyai hrudayāya namaḥ | Om harińyai śirasē svāhā |
Om suvarńarajatasrajāyai śikhāyai vaśaT | Om candrāyai kavacāya hum |
Om hirańmayyai nētratrayāya vauśaT | Om lakśmyai astrāya phaT |
Om iti digbandhaḥ ||

**atha dhyānam**

Om aruNakamala-samsthā tadrajaH punjavarNā
karakamala-dhruteŚTābhīti-yugmāmbujātā |

maNimukuTa-vicitrālankrutiH padmamālā
bhavatu bhuvanamātā santatam śrīH śriyai naH ||

kamalam kalaśam dhēnum jnānam-anjalimēva ca |
panchamudrāH pradarśayātra śrīsūktam prajapēdbhudaH ||

|| iti dhyānam ||

**|| Om namō bhagavatyai mahālakśmyai namaḥ ||**

hirańyavarńām harińīm suvarńa rajatasrajām |

candrām hirańmayīm lakśmīm jātavedo ma āvaha || (1)

tām ma āvaha jātavedō lakśmīmanapagāminīm |

yasyām hirańyam vindeyam gāmaśvam puruśānaham || (2)

aśvapūrvām rathamadhyām hastināda-prabodhinīm |

śriyam devīmupahvayē śrīrmā dēvī juśatām || (3)

kāmsōsmitām hirańyaprākārāmārdrām jvalantīm truptām tarpayantīm |

padmēsthitām padmavarńām tāmihopahvayē śriyam || (4)

candrām prabhāsām yaśasā jvalantīm śriyam loke devajuśtāmudārām |

tām padminīmīm śarańamaham prapadyēऽlakśmīrmē naśyatām tvām vruńe || (5)

ādityavarńē tapasōdhijātō vanaspatistava vrukśōtha bilvah |

tasya phalāni tapasā nudantu māyānta rāyāśca bāhyā alakśmīh || (6)

upaitu mām devasakhah kīrtiśca mańinā saha |
prādurbhūtōsmi rāśtrēsmin kīrtimruddhim dadātu mē || (7)

kśutpipāsāmalām jyeśTām-alakśmīm nāśayāmyaham |
abhūtimasamruddhim ca sarvām nirńuda me gruhāt || (8)

gandhadvārām durādharśām nityapuśtām karīśińīm |
īśvarīm sarvabhūtānām tāmiho pahvaye śriyam || (9)

manasah kāmamākūtim vacassatyamaśīmahi |
paśūnām rūpamannasya mayi śrīh śrayatām yaśah || (10)

kardamēna prajābhūtā mayi sambhava kardama |
śriyam vāsaya mē kulē mātaram padmamālinīm || (11)

āpah srujantu snigdhāni ciklīta vasa mē gruhē |
ni ca dēvīm mātaram śriyam vāsaya me kulē || (12)

ārdrām puśkarińīm puśtim pingalām padma mālinīm |
candrām hirańmayīm lakśmīm jātavedo ma āvaha || (13)

ārdrām yahkarińīm yaśTim suvarńām hēmamālinīm |
sūryām hirańmayīm lakśmīm jātavedo ma āvaha || (14)

tām ma āvaha jātavedō lakśmīmanapagāminīm |
yasyām hirańyam prabhūtam gāvō dāsyośvān, vindeyam puruśānaham || (15)

*pariśista*

yaśyucih prayatō bhūtvā juhuyādājyamanvaham |
śriyah pancadaśarcam ca śrīkāmah satatam japēt || (1)

padmāsane padmaūru padmākśī padmasambhave |
tvam mām bhajasva padmākśī yena saukhyam labhāmyaham || (2)

aśvadāyī godāyī dhanadāyī mahādhane |
dhanam me juśatām devī sarvakamārtha siddhaye || (3)

putra pautra dhanam dhānyam hastyaśvādi gave ratham |
prajānām bhavasi mātā āyuśmantam karotu mām || (4)

dhanamagnir dhanam vāyuh dhanam sūryo dhanam vasuh
dhanamindro bruhaspathir varuńam dhanamaśńute || (5)

vainateya somam piba somam pibatu vrutrahā |
somam dhanasya somino mahyam dadātu sominī || (6)

candrābhām lakśmimīśānām sūryābhām śriyamaiśvarīm |
candrasūryāgnisankāśam śrī mahālakśmīmupāsmahē || (7)

na krodho na ca matsaryo na lobho nāśubhāmatih |
bhavanti kruta puńyānām bhaktānām śrīsūktam japetsadā || (8)

varśantu te vibhāvari divo abhrasya vidyutah |
rohantu sarvabījanyava brahmadviśo jahi || (9)

padmapriye padmini padmahaste padmālaye padmadalayatākśi |
viśńupriye viśńumanonukūle tvadpādapadmam mayi sannidhasva || (10)

yā sā padmāsanasthā vipula kaTitaTī padmapatrāyatākśī
gambhīra vartanābhistana bharanamita śubhra vastrottarīya |
lakśmīrdivyai gajendrair mańigańakhacitair snāpitā hema kumbhai
ńityam sā padma hastā vasatu mama gruhe sarva māngalya yuktā || (11)

lakśmīm kśīra samudra rājatanayām sriranga dhāmēśvarīm
dāsībhūta samasta devavanitām lokaika dīpānkurām |
śrī manmanda kaTākśa labdha vibhava brahmendra gangādharām
tvām trailokya kuTumbinīm sarasijām vandē mukunda priyām || (12)

siddha lakśmīr mokśalakśmīr jayalakśmīh sarasvatī |

śrīlakśmīr varalakśmīśca prasanna bhava sarvadā || (13)

varānkuśau pāśamupaiti mudrām karairvahantīm kamalāsanasthām |
bālārka koTi pratibhām triṅetrīm bhajēha mādyām jagadīśvarīm tām || (14)

sarvamangaLa māngalye śivē sarvārtha sādhakē |
śaraṅyē trayambakē gaurī nārāyaṅi namostu tē || (15)

mahālakśmyai ca vidmahe viśṅu patnyai ca dhīmahi
tanno lakśmīh prachodayāt || (16)

Om śān-tiḥ śān-tiḥ śān-tiḥ ||

**phalaśruti**

śrīrvarchasyamāyuśyamārōgyam āvidhātpavamānam mahīyatē |
dhanam dhānyam paśum bahuputralābham śatasamvatsaram dhīrghamāyuH ||

**|| Om śrī sūkta pārāyaNam sampūrNam ||**

|| hariḥ Om ||